ननु हिंस्राय क्षत्रधर्मो निंद्य एवेत्याशंक्याह कथमिति [illegible] हिंसार्थमुत्पन्ना हिंस्रयोनौ जाताः हिंसैकजीवनास्तदेवतस्यैव हिंस्रधर्मस्य निं
दां कथं भाषेयुः कथं वा तत्र धाता तस्य धर्मस्य स्रष्टा न निंदेत धातृविहितत्वात्सहजत्वाच्च नासौ धर्मो निंद्य इत्यर्थः यदाह भगवान्सदोषमपि कौन्तेय स
हजं कर्म न त्यजेदिति १९ कथं तर्हि जाबालोपनिषदि अथ परिव्राट् मुंडो विवर्णवासा इत्युपक्रम्य भरतो वत कथमभरतोऽतुन्मत्तो उन्मत्तवदाचरत् इति भरता
दीनां क्षत्रियाणां मोक्षमप्युन्मत्तचर्या च अरूपत इत्याशंक्याह त्रियेति ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति श्रुतेः त्रियात्यल्पा विद्या हीनैः

कथं तस्मात्समुत्पन्नास्तन्निष्ठास्तदुपाश्रयाः तदेव निंदां भाषेयुर्धाता तत्र न गर्हति १९ त्रिया विहीनैरधनैर्ना
स्तिकैः संप्रकीर्तितं वेदवादस्य विज्ञानं सत्याभासमिवानृतं २० शक्यं तु मौड्यमास्थाय विभ्रतात्मानमात्मना
धर्मच्छद्म समास्थाय पच्यवितुं न तु जीवितुं २१

त्रयधनैर्लक्ष्म्या च हीनैः इदमनृतं प्रवर्तितं वेदयतीति वेदो विधिस्तस्य वादोऽर्थवादस्तत्संबंधि विज्ञानं संन्यासविधिस्तत्प्रशंसार्थं भरतादिकीर्तनं प्रता
पतिवयात्वेन नवदर्थवादेन नतु तावता मोक्षेऽपि क्षत्रियस्याधिकारः सिद्ध्यतीति भावः २० यत्तु कृतः प्राणाहितो गच्छन्नित्यन्याश्रमउक्तस्तं दूषयति श
क्यमिति आत्मानं देहमात्मना स्वेनैव विभ्रता निश्चलेस्यापयता धर्मच्छद्मकपटयोगं आस्थाय पच्यवितुं तं तु मेव शक्यं न जीवितुं केवलप्राणधाने
न शरीरनाशो भवेदित्यर्थः २१

रा० यत्नुस्वभावस्तत्रजन्म इति मुखवालस्मनयान वेदेहपात्रासिद्धिरुक्तानो दूषयति । इस्यांशकं पुनरिति पुत्राघमरणेनपशुसाम्येन च तत्रापि दे
१८ षामीत्यर्थः अथेतस्तः शब्दार्थेतरकचरं अनेन प्रकारेणारण्यकचर्याविनावपुराणश्रेयांसे आहुः सा च मज्जोप्यस्तीति न तयोर्विशेष इति भावः २२ सन्यासयु
क्तमेकाकित्वमपि निःस्पृतिद्वाभ्यां यतीति २५ ननु पश्चादयः कर्मयोनयो न भवन्ति किंतु पूर्वकृतमेव तेभुंजते अहंतु कर्माविकृतः स्वयंत्तनक्कवं पदंप्रा

शक्रो पुनररण्येषु सुखमेकेन जीवितं अविस्तृनापुत्रपौत्रान्देवर्षीनतिथीन्पितृन् २२ नेमेमृगाः स्वर्गजितो नव
राहा न पक्षिणः तथानेन प्रकारेणा पुरायमाद्कुर्नितेजनाः २३ यदि सन्यासतः सिद्धिं राजन्कश्चिदवाप्नुयात् पर्वता
श्च द्रुमाश्चैव क्षिप्रं सिद्धिमवाप्नुयुः २४ एतेहिनित्यसंन्यासा दृश्यंते निरुपद्रवाः अपरिग्रहवंतश्च सततं ब्रह्मचारि
णः २५ अथचेदात्मभाग्येषु नान्येषां सिद्धिमश्नुते तस्मात्कर्मैव कर्तव्यं नास्ति सिद्धिरकर्मणः २६ औदकाः सृष्
यश्चैव जंतवः सिद्धिमाप्नुयुः येषामात्मैव भर्तव्यो नान्यः कश्चन विद्यते २७ ॥ ॥ ॥ ॥

स्यामीति चेत्तत्राह आत्मभाग्येषु स्वसंपत्सु अन्येषां सिद्धं परकर्मार्जितफलं नाप्नुते किंतु स्वकर्मार्जितमेवाप्नुते तर्हि कर्मैव कुर्वित्यर्थः सिद्धिर्मोक्षः
२६ ननु मुमुक्षूणां देहभरणव्यतिरिक्तं कर्मणापेक्षितमित्यत आह औदका इति उदके भवा मीनादयः सृष्टयः स्थावरास्तेषामपि देह आत्मैव दे राम०
हस्तव भर्तव्यो नान्य इतितिपिसुच्यरन २७ ॥ १८

३१

लोकदृष्ट्यापिकर्मैवकर्तव्यमित्याह अवेक्षस्वेति १८ दशमोध्यायः एवंसंन्यासःश्रेयानितिधर्मस्यपक्षःगार्हस्थ्यंश्रेयइतिभीमस्यपक्षःतत्राद्यस्यश्रैष्ठ्यंमत्वाविवि
कारिकंसंन्यासंमापक्षयागार्हस्थ्यमेवश्रेयइत्यारव्यायिकामुखेनसमर्थयन्नर्ज्जुनउवाच अत्रैवेत्यादिना १ प्रवव्रजुः पुनर्गृहंप्रतिनगंतव्यमितिप्रकर्षेणगता

अवेक्षस्वयथास्वैःस्वैःकर्मभिर्व्याहृतंजगत् तस्मात्कर्मैवकर्त्तव्यंनास्तिसिद्धिरकर्म्मणः १८ इतिश्रीमहाभारते
शांतिपर्वणिराजधर्मेभीमवाक्यंदशमोध्यायः अर्ज्जुनउवाच अत्रैवोदाहरंतीममितिहासंपुरातनं तापसैस्सह
संवादंशक्रस्यभरतर्षभ १ केचिद्गृहान्परित्यज्यवनमभ्यागमन्द्विजाः अजातश्मश्रवोमंदाः कुलेजाः प्रवव्रजुः ता: ३
२ धर्मोयमितिमन्वानाः समृद्धाब्रह्मचारिणः त्यक्त्वाभ्रातॄन्पितॄंश्चैवतानिंद्रोन्वकृपायत ३ तानाबभाषेभगवा
न्पक्षीभूत्वाहिरण्मयः सुदुष्करंमनुष्यैश्चयत्कृतंविघसादिभिः ४ पुण्यंभवतिकर्म्मेदंप्रशस्तंचैवजीवितं सिद्धा
र्थास्तेगतिंमुख्यांप्राप्ताधर्म्मपरायणाः ५ ऋषयऊचुः अहोबतायंशकुनिर्विघसाशान्प्रशंसति अस्मान्नू
नमयंशास्तिवयंचविघसाशिनः ६

इत्यर्थः २ विघसाशिभिः महायज्ञावशिष्टभोजिभिः ४ शास्तिज्ञापयतिविगतोघसोऽन्नायस्मात्तदन्नंविघसंशीर्णशिलापर्णफलादिकंतदन्न
शीलास्तत्वयमेवातोविघसाशिनःश्रेयांसःस्मइतिभेदिरित्यर्थः ६

पंकदिग्धानरजस्वलानित्यागंतुकस्वाभाविकदोषयुक्तलघुक्तंक्रमेण। उच्छिष्टभोजिनइतिप्रायेणाशीर्णत्वशापर्णफलानिमृगकीटपक्षमुच्छि
ष्टानिभवंतितन्त्भोजिनोमंदान्नूनम् ७ तत्रवचइतिशेषः अश्रद्धानेवकात्मा शक्तितान्पोमंतात्मेतिइत्यात्मनेकायविभागोविषमभागद्वयं

शकुनिरुवाच नाहंयुष्मान्प्रशंसामिपंकदिग्धानरजस्वलान् उच्छिष्टभोजिनोमंदानवैवोविघसाशिनः
७ ऋषयऊचुः इदंश्रेयःपरमितिवयमेवाभ्युपास्महे शकुनेब्रूहियच्छ्रेयोभृशंवैश्रद्दधामहे ८ शा
कुनिरुवाच यदिमांनाभिशंकध्वंविभज्यात्मानमात्मना ततोहंवःप्रवक्ष्यामियाथातथ्यंहितंवचः ९ ऋ
षयऊचुः शृणुमस्तेवचस्तातपंथानोविदितास्तव नियोगेचैवधर्मात्मन्स्थातुमिच्छामशाधिनः
१० शकुनिरुवाच चतुष्पदांगौःप्रवरालोहानांकांचनंवरं शब्दानांप्रवरोमंत्रोब्राह्मणोद्विपदांवरः ११
मंत्रोयंजातकर्मादिर्ब्राह्मणस्यविधीयते जीवतोपियथाकालंश्मशाननिधनादिभिः १२ कर्माणिवैदिका
न्यस्यस्वर्ग्यःपंथाःऋतस्तमः कथंमेसर्वकर्माणिमंत्रसिद्धानिचक्रिरे १३

यदिस्वात्तानमविष्यतेत्यर्थः। ९ पंथानःश्रेयोमार्गाः १० मंत्रोमंत्रोक्तसंस्कारःश्मशानेतिपदंपतितनिधनव्यावृत्त्यर्थं १२ कर्माणिस्वर्ग्यःपंथाइ
तिनेचत्वर्हिकथंमेमयाप्रक्षंमदर्थंवाकर्माणिचक्रिरेप्राचःस्वर्गार्थिनइतिशेषः अतस्तानिस्वर्ग्याणिभवंतिभावःमंत्रसिद्धानिमंत्रैःप्रकाशितानि
१३

आत्मानमिति दृढवादी दृढनिश्चयः पुमान्यथात्मानंइति रुतिगुणाभाव आर्षः यः देवतारूपं जानीते अयमहमस्मि सोऽवशिवइतितथैवेहलोके शास्त्रे
वासिद्धिस्तद्देवतातादात्म्यरूपा इष्यते तथा पापयोपासते तथैव प्रत्यक्षवतीतिश्रुतेः अयथागमोपायादेवतांनिराहतस्यात्स्यान्ह्यमनुभवतीतिस्मृते
श्च तत्र कतिप्रकारा सिद्धिरित्यत आह मासेति माघादिभिर्मासैः शुक्लैरर्द्धमासैः शिशिरादिभिर्ऋतुभिश्च आदित्यमार्गप्राप्तिरूपा एका सिद्धिः क्रम
मुक्तिस्थानभूतब्रह्मलोकावाप्तिफला तथा श्रावणादिभिर्मासैः कृष्णैरर्द्धमासैः वर्षादिभिर्ऋतुभिः शशिमार्गप्राप्तिरूपा द्वितीया सिद्धिः पुनरावृ

आत्मानं दृढवादीति तथा सिद्धिरिहेष्यते मासार्द्धमासा ऋतव आदित्यशशितारकं १४
ईहंते सर्वभूतानि तदिदं कर्मसंज्ञितं सिद्धिक्षेत्रमिदं पुराणमयमेवाश्रमो महान् १५ ॥

त्तिस्थानभूतस्वर्गलोकावाप्तिफला तथा मार्गद्वयानपेक्षात् आध्यात्मिकमाधिभौतिकं वाऽविमुक्तमुपासीनानां देहान्ते तारकब्रह्मावाप्तिरूपा
तृतीया सर्वोत्तमुक्तिफला तथा च श्रुतयः सूर्यतारब्रह्मगमयति न स पुनरावर्त्तते इति तथा एतमेवाध्वानं पुनर्निवर्त्तते इति तथाऽत्रहि जंतोः
प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षी भवतीति च क्रमेणार्थः १४ ईहंत इति तदिदं आदित्यशशिता
रकात्मकं सिद्धित्रयं कर्मसंज्ञितं कर्मफलत्वेनाभिहितं ईहंते कामयंते सर्वभूतानि तस्मात्कर्माधिकारस्थानं गार्हस्थ्यमेव सिद्धिक्षेत्रं पु
राणश्चायमाश्रयो महांश्च १५ ॥

रा०
२०
अन्यथा दोषमाहाथेति निंदातः निंदां कृत्वा कापथं त्वदुक्तं त्यागमार्गं ये गताः तेषां सनः पापं विद्यते १६ आदिश शितार कारव्यसिद्धित्रयानादे
दुर्गतिमाहदेवेति वंशइव वंशः चिरादिपर्वोपेतत्वान्मार्गः देववंशो देवयानमार्गः तथा पितृवंशः पितृयानमार्गः ब्रह्मवंशो ब्रह्मा वाग्निमार्गः तत्रास्तु पाप
वहुत्वात्रस्ये कं वहुवचनात् एषां त्यागेन अस्मृतीपथं क्षुद्रदंदश्रूकादियोनिं यांति अतीतिदैर्घ्यमार्षं १७ एतत्कर्मवः पुष्माकमस्त्वितत्वतयोयु
क्तं उपासनायुक्तं उपासना चात्र द्विविधाऽध्यात्माः तत्र यज्ञांगेऽस्वादौ विराड्दृष्टिरूपा वात्र अश्वस्य मेध्यस्य शिर इत्यादिना विहितात्या आधत्वावि

अपये कर्म निंदितो मनुष्याः कापथं गताः मूढानामर्थहीनानां तेषामेनस्तु विद्यते १६ देववंशा
न्पितृवंशान्ब्रह्मवंशान्स्ववंशाइवतान् संत्यज्य मूढा वर्त्तंते ततो यांत्यस्मृतीपथं १७ एतद्वोऽस्त्वितयोयु
क्तं ददामीत्यृषिचोदितम् तस्मात्तत्तद्व्यवस्थानं तपस्वि तप उच्यते १८ ॥ ॥

मुक्तोपासना सोऽविमुक्त उपास्य इत्युपक्रम्य कतमश्चासौ स्यानं ब्रुवोर्घ्राणस्य च यः संधिरित्यादिना विहिता एते न द्विविधाप्युपासना कर्म
समुच्चितेव कर्त्तव्येति दर्शितं किं पूर्ण एतत्कर्म ददामीति ऋषिणा मंत्रेण चोदितं तथा चिंद्रवाकं कर्मकांडे देहि मे ददामि त इति देवतोद्देश
नद्रव्यत्यागरूपं यागं कुरु त्वं चाहं पुत्रपश्वस्वर्गादिकं फलं दास्यामीति मंत्रार्थः यस्मादेवं तस्मात्तत्तत्तत्तत्र मार्गव्यवस्थानं निष्काम
विका स्थितिः तदेव तपस्विनस्तप इत्युच्यते तेनात्मकायशोषणादि १८ राम०
२०

देवेति अंगोपांगियुक्तं वा केवलं वा विमुक्तो पांगियुक्तं वा देववंशादिशब्दोपलक्षितं कर्म गुरोः चर्यां संविभज्य परस्मात् विशेषेण दिननाडी
विभागेन नित्यं क्रियमाणं दुष्करं दुःसाध्यमुच्यते विद्वद्भिः इत्ययमेव कर्तव्यमिति भावः १९ एतद्देवपुरस्कृत्य हठपतिर्देवाइति २० तपः
कर्मैव प्रजानां मूलमतः श्रेष्ठयतः अनेन च्छांदोग्यदृष्टेन कुटुंबविधिना कुटुंबेषु चोद्देशस्वाध्यायमधीयानइत्यादिना यस्मिन्गृहस्थक

देववंशान्ब्रह्मवंशानग्निवंशांश्च शाश्वतान् संविभज्य गुरोश्चर्यामिति दुष्करमुच्यते १९ देवा वै दुष्करं कृत्वा विभू
तिं परमां गताः तस्माद्गार्हस्थ्यमुद्वोढुं दुष्करं प्रब्रवीमि वः २० तपः श्रेष्ठं प्रजानां वै मूलमेतन्न संशयः कुटुंबवि
धिनानेन यस्मिन्सर्वं प्रतिष्ठितं २१ एतद्धि दुस्तपो विप्रा इह द्वातीना विमत्सराः तस्माद्धृतमध्यमं तु लोकेषु तप उच्य
ते २२ दुराधर्षपदं चैव गच्छंति विघसाशिनः सायंप्रातर्विभज्यान्नं स्वकुटुंबे यथाविधि २३ दत्वातिथिभ्यो देवे
भ्यः पितृभ्यः स्वजनस्य च अवशिष्टानि ये श्नंति तानाहुर्विघसाशिनः २४ तस्मात्स्वधर्ममास्थाय सुव्रताः स
त्यवादिनः लोकस्य गुरवो भूत्वा ते भवंत्यनुपस्कृताः २५ त्रिदिवं प्राप्य शक्रस्य स्वर्गलोके विमत्सराः वसंति
शाश्वतान्वर्षान्जनादुष्करकारिणः २६

र्गिणि सर्वं प्रतिष्ठितं तथा च सूत्रं कृत्स्नभावात्तु गृहिणोपसंहार इति सर्वेषामाश्रमाणां
गां धर्मा गृहे एव संतिन तत्र तत्रेति हेतोश्छांदोग्ये कुटुंबइत्यादिश्रुत्या गृहिणो वा विघोपसंहारः कृत इति सूत्रार्थः २१ एतद्ब्रह्मचर्याद्युप
तमध्ययनं मध्यमं च तद्धि हितयज्ञादि वितपः शब्देनोच्यते २२ तयोर्द्वितीयं स्मोति दुराधर्षेति विघसाशिपदं व्याचष्टे सायमिति सार्द्धेन
२३ अनुपस्कृताः निःसंशयाः २६ ॥

शा० तत इति तेतत्रणाःसन्न्यासचिकीर्षवः उत्सृज्यनास्तीतिगताः आश्रमांतरेसिद्धिर्नास्तीतितदुत्सृज्यगताइतियोज्यं २७ फलितमाहतस्मादिति २८
२१ राजधर्मार्थप्रकाशेएकादशः एवमर्जुनवाक्यात्कर्मणामवश्यकर्त्तव्यत्वेसिद्धेसंगंकर्तृत्वाभिमानंफलाशांचत्यक्त्वातानिकर्त्तव्यानीतिनकुलवाक्ये
नप्रतिपादयिष्यन्नारभते अर्जुनेत्यादि १ ताम्रास्यःदुःखेनाविवर्णमुखः २ विशाखयूपेक्षेत्रविशेषे देवानांदेवैःअग्न्ययःअग्निस्थाप

अर्जुनउवाच ततस्तेतद्वचःश्रुत्वाधर्मार्थसहितंहितं उत्सृज्यनास्तीतिगतागार्हस्थ्यंसमुपाश्रिताः २७ तस्मा
त्त्वमपिधर्मज्ञस्थैर्यमालंब्यशाश्वतं प्रशाधिपृथिवीकृत्स्नांहतामित्रांनराधिप शांतौमोक्षधर्मेषु वैशंपायनउ
वाच अर्जुनस्यवचःश्रुत्वानकुलोवाक्यमब्रवीत राजानमभिसंप्रेक्ष्यसर्वधर्मभृतांवरः १ अनुरु
ध्यमहाप्राज्ञोभ्रातुश्चित्तमरिंदमः व्यूढोरस्कोमहाबाहुस्ताम्रास्योमितभाषिता २ नकुलउवाच वि
शाखयूपेदेवानांसर्वेषामग्नयश्चिताः तस्माद्विद्धिमहाराजदेवाःकर्मफलेस्थिताः ३ अनास्तिका
नांभूतानांप्राणादाःपितरश्चमे तेपिकर्मैवकुर्वंतिविधिंसंप्रेक्ष्यपार्थिव ४ ॥ ॥ ॥

५ नापीनिस्थंडिलानिचिताःइष्टकाभीरचिताःअघापिदृश्यंतेतेनदेवत्वमपिकर्मफलमेवेत्यर्थःकर्मणापितृलोकोविद्ययादेवलोकइतिश्रुते
स्वयनाश्रितविद्यावलात्ब्रह्मलोकंगतायतेत्रदेवाः ३ तपाश्वकेवलकर्मणास्वर्लोकंगतायेतेअपितरइतिबोध्यं आनास्तिकानां
आस्तिकानांभूतानामपियावंतरेसपटोर्धःप्राणादाःवृष्टिद्वाराअन्नप्रदाःअन्नंहप्राणाइतिश्रुतेःविधिंअग्निर्वाअकामयतेत्यादिंअस्मादिभाव शा०
स्यकर्मसाधनत्वज्ञापकं ४ ॥ २१

वेदवादेष्वपविद्धस्तत्कोपैत्यान् ५ देवयानेनमार्गेण पृष्ठंउपरिभागंब्रह्मलोकमित्यर्थः अयंगृहाश्रमः सर्वानाश्रमान् अतित्र
तिक्रांतः तेभ्यः श्रेष्ठइत्यर्थः ६ तान्ब्राह्मणान्गत्वानिबोधबुद्ध्यस्व अवासृजन्समर्पयन् ७ कृतात्माजितचित्तः अहंममाभिमानशून्यइ
त्यर्थः सत्यागीसात्त्विकइतिशेषः ८ सुखादानंगार्हस्थ्यसुखभोगं ऊर्ध्ववनादौ प्रतिष्ठितोनिष्ठावान्सन्नयः आत्मत्यागीदेहत्यागीस

वेदवादापविद्धांश्चतान्विद्धिभ्रशनास्तिकान् नहिवेदोक्तमुत्सृज्यविप्रःसर्वेषुकर्मसु ५ देवयानेननाक
स्यपृष्ठमाप्नोतिभारत अत्याश्रमानयंसर्वान्नित्यांकुर्वेदनिश्चयाः ६ ब्राह्मणाःकृतिसंपन्नास्तान्निबोध
जनाधिप वित्तानिधर्मलब्धानिक्रतुमुख्येष्ववासृजन् ७ कृतात्मासमहाराजसर्वत्यागीस्मृतोनरः अनवेक्ष्य
सुखादानंतथैवोर्ध्वंप्रतिष्ठितः आत्मत्यागीमहाराजसत्यागीतामसःप्रभो ९ अनिकेतःपरिपतन्वृक्षमूलाश्र
योमुनिः अपाचकःसदायोगीसत्यागीपार्थभिक्षुकः १०

तामसोमतः अनधीत्यद्विजोवेदाननुत्पाद्यसुतानपि अनिष्ट्वाशक्तितोयज्ञैर्मोक्षमिच्छन्व्रजत्यधइतिमनूक्त्यनभिज्ञत्वात्तामसोयंत्या
गीतिभावः ९ परिपतन् भिक्षार्थंपर्यटन् पतोऽपावकः योगीनिरुद्धसर्ववृत्तिः भिक्षुकइतियोचाधर्मोब्राह्मणाःस्मृतः सोयंब्राह्मणाकल्पः
धर्मःशुभोपिप्रजापरिपालनेक्लेशासहेनक्षत्रियेणाश्रितइतिराजसत्वाद्दोषमूलः तथाचस्मृतिः यदावैक्षत्रियःपापंभवतिब्राह्मणा
कल्पोस्यप्रजायामाजायेतेतिमाभूत्वंयाचकोभिक्षुकः १०

शां० १२ सन्यसेत्सर्वकर्माणि वेदं तु न परित्यजेत् निपततो वेदमभ्यस्यन्पुत्रैश्वर्यं सुखं वसेदिति मनुः उक्तं वेदसन्न्यासमकृत्वा ऽभ्यासात् राजा निवसन्सामीप्यात् शंक्याह क्रोधेति विप्र
इत्यनेनायमपि धर्मो ब्राह्मणस्यैव विहितोधिकारादिति दर्शितं तेनायं त्यागो राजसस्संवपूर्वोदितिसिद्धं १२ समीक्षेति आश्रमांतरेस्वर्गस्वामिन का
मः गार्हस्थ्ये तु भयमस्तीत्ययमेव मार्गो गतिश्चेत्यर्थः १३ इतीति आवश्यकमेवेदं ममेति भावं कृत्वा यः संगफलेच्छारहितः करोति सत्यागी नान्य इ

क्रोधहर्षावनादृत्य पैशुन्यं च विशेषतः विप्रो वेदानधीते यः सत्यागी पार्थ भिक्षुकः ११ आश्रमांस्तुलया स
र्वान्धृतानाहुर्मनीषिणः एकतस्ते त्रयो राजन्गृहस्थाश्रम एकतः १२ समीक्षते तु यो ऽपार्थ्यकामं स्वर्गं च भारत
अयं पंथा महर्षीणामियं लोकविदां गतिः १३ इति यः कुरुते भावं सत्यागी भरतर्षभ न यः परित्यज्य गृहान्वनमेति वि
मूढवत् १४ यदा कामान्समीक्षेत धर्मवैतंसिको नरः अथैनं मृत्युपाशेन कंठे बध्नाति मृत्युराट् १५ अभिमान
कृतं कर्म नैतत्फलवदुच्यते त्यागयुक्तं महाराज सर्वमेव महाफलं १६ शमो दमस्तपो धैर्यं सत्यं शौचमथार्जवं
यज्ञो धृतिश्च धर्मश्च नित्यमार्षो विधिः स्मृतः १७ पितृदेवातिथिकृते समारंभो ऽत्र शस्यते अत्रैव हि महाराज त्रि
वर्गः केवलं फलं १८ एतस्मिन्वर्तमानस्य विधावप्रतिषेधिते त्यागिनः प्रसृतस्येह नोच्छित्तिर्विद्यते क्वचित् १९

त्यर्थः १४ वनेपि काम स्मरणं चेत्तत्कृतमेवेत्याह धर्मवैतंसिको धर्मध्वजी १५ अभिमानः कर्ताहमित्येवंरूपस्तेन कृतं कर्म फलवन्न गतिप्रदं
न त्यागयुक्तं अभिमानत्यागोपेतं १६ आर्षं ऋषीणां हितः १७ अत्र गार्हस्थ्ये १८ इह विधौ प्रसृतस्य निष्ठावतः १९ ॥ ॥ शांप० १२

२१ तच्च कर्म गृहस्थाश्रमिणो विशेषकं निगडवद्विशेषेणरोधकं २२ राजन्त्यागे दोषमाहतदिति २३ अपरे योगिनः महायज्ञानिति बहुवचनं वि
तर्कविचाराद्यवांतरयोगभेदापेक्षं २५ त्रिधापियज्ञेषु घोतीतकालः उपस्थितं तमध्यममुल्लंघ्यान्त्यस्य वार्तां कुर्वतस्ते नास्तिको स्पष्टमित्याहस इति २६

असृजद्धि प्रजा राजन्प्रजापतिरकल्मषः मां यक्ष्यंतीति धर्मार्त्मा यज्ञैर्विविधदक्षिणैः २० वीरुधश्चैव वृक्षांश्च
यज्ञार्थं वै तथौषधीः पशूंश्चैव तथा मेध्यान्यज्ञार्थानिहवींषि च २१ गृहस्थाश्रमिणास्तच्च यज्ञकर्मविरोधकं त
स्माद्गार्हस्थ्यमेवेह दुष्करं दुर्लभं तथा २२ तत्संप्राप्य गृहस्था ये पशुधान्यधनान्विताः न यजंते महाराज शाश्व
तं तेषु किल्बिषं २३ स्वाध्याययज्ञा ऋषयो ज्ञानयज्ञास्तथापरे अथापरे महायज्ञान्मनस्येव वितन्वते
२४ एवं मनः समाधानं मार्गमातिष्ठतो नृप द्विजातेर्ब्रह्मभूतस्य स्पृहयंति दिवौकसः २५ स रत्नानि विचित्रा
णि संहृतानि ततस्ततः मखेष्वनभिसंत्यज्य नास्तिकमभिजल्पसि २६ कुटुंबमास्थिते त्यागं न पश्यामि नराधिप
राजसूयाश्वमेधेषु सर्वमेधेषु वा पुनः २७ ये चान्ये क्रतवस्तात ब्राह्मणैरभिपूजिताः तैर्यजस्व महीपाल
शक्रो देवपतिर्यथा २८ राज्ञः प्रमाददोषेण दस्युभिः परिमुष्यतां अशरण्यः प्रजानां यः स राजा कलिरुच्यते २९
अश्वान्गाश्चैव दासीश्च करेणूश्च स्वलंकृताः ग्रामाञ्जनपदांश्चैव क्षेत्राणि च गृहाणि च ३० ॥

पूर्वं विदसन्न्यासे पितृवाधिकारो नास्तीत्युक्तं इदानीं विदसन्न्यासस्य वनसंभवतीत्यर्द्धेनाह कुटुंबमिति कुत्र तर्हि त्यागं पश्यसीत्यत आह राजसूयेति
२७ फलितमाह ये चेति २८ प्रमादो राज्याकरणं परिमुष्यतां लुप्यमानानां ३०

शा० मात्सर्यवेषुद्रोहः दानाभावेनकलिस्वरूपाराजकलयंजाताइत्यर्थः ३३ अंतरालेपिशाचयोनौ ३४ अंतर्व्यासंगः अहंज्ञातादाताकर्त्ताहं
२३

अप्रदायद्विजातिभ्योमात्सर्याविष्टचेतसः वयंतेराजकलयोभविष्यामविशांपते ३१ अदातारोशरण्याश्चराज
किल्विषभागिनः दुःखानामेवभोक्तारोनसुखानांकदाचन ३२ अनिसृज्यचमहायज्ञैरकृत्वाचपितृस्वधां तीर्थेष्व
नभिसंप्लुत्यप्रव्रजिष्यसिचेद्विभो ३३ छिन्नाभ्रमिवगंतासिविलयंमारुतेरितं लोकयोरुभयोर्भ्रष्टोह्यंतरालेव्यव
स्थितः ३४ अंतर्बहिश्चयत्किंचिन्मनोव्यासंगकारकं परित्यज्यभवेत्त्यागीनहित्वाप्रतितिष्ठति ३५ एतस्मिन्व
र्तमानस्यविधावप्रतिषेधिते ब्राह्मणस्यमहाराजनोच्छित्तिर्विद्यतेक्वचित् ३६ निहत्यशत्रूंस्तरसासमृद्धान्शक्रोय
थादैत्यबलानिसंख्ये कःपार्थशोचेन्निरतःस्वधर्मेपूर्वैःस्मृतेपार्थिवशिष्टजुष्टे ३७ क्षात्रेणधर्मेणपराक्रमे
णजित्वामहींमंत्रविद्भ्यःप्रदाय नाकस्यपृष्ठेसिनरेंद्रगंतानशोचितव्यंभवताद्यपार्थ ३८ इतिश्रीमहाभारतेशां
तिपर्वणिराजधर्मेनकुलवाक्यंद्वादशोध्यायः १२

नित्यादिशास्त्रप्रज्ञावहिर्व्यासंगःपुत्रपश्वादिप्रज्ञाः तयोःकारकंमूलंअहंकारममकारौतत्त्यक्त्वैवत्यागीभवेन्नतुयोगःहंहित्वाप्रतितिष्ठति शां०
सइत्यर्थः ३६ ॥ २३

नवाह्यमिति अहंकारममकारौ तत्क्ष्याविमुक्तं तत्राद्यत्यागे सर्वव्यवहारोच्छेदः स्यादिति ममकारस्य त्याज्यत्वं इत्येतदर्थमध्याय आरभ्यते तत्र द्रव्यं ममकारस्य
द्विविधं बाह्यं व्यावहारिकं शारीरं शरीरमेव मनःकल्पितं च यथोक्तं घटो मे तत्र पथा मयावितिं तथा च श्रुतिर्विदुषो विदेहकैवल्यकाले बाह्यद्रव्यस्य कारणेल
यं दर्शयति गताः कलाः पंचदश प्रतिष्ठा इति कलाः प्राणमनःप्रभृतयः प्रतिष्ठाः उपादानकारणानि प्रतिगताः तथा इमाः षोडशकलाः पुरुषायणाः पुरु

सहदेवउवाच नवाह्यंद्रव्यमुत्सृज्यसिद्धिर्भवतिभारत शारीरंद्रव्यमुत्सृज्यसिद्धिर्भवतिवानवा १ वाह्यद्रव्य
विमुक्तस्यशारीरेषुचगृध्यतः योधर्मोयत्सुखंवास्याद्द्विषतांतत्तथास्तुनः २ शारीरंद्रव्यमुत्सृज्यपृथिवीमनु
शासतः योधर्मोयत्सुखंवास्यात्सुहृदांतत्तथास्तुनः ३ द्व्यक्षरस्तुभवेन्मृत्युस्त्र्यक्षरंब्रह्मशाश्वतं ममेतिच
भवेन्मृत्युर्नममेतिचशाश्वतं ४ ब्रह्ममृत्यूततोराजन्नात्मन्येवसमाश्रितौ अदृश्यमानौभूतानियोधयेता
मसंशयं ५ अविनाशोस्यसत्वस्यनियतोयदिभारत हत्वाशरीरंभूतानांनहिंसांप्रतिपत्स्यसे ६ ६ ॥ ६

षंप्राप्यास्तंयन्तीतिमनःकल्पितानांपुरुषेलयंदर्शयति अतःशारीरमेवद्रव्यंबंधमूलंनवाह्यमितिवाह्यत्यागोव्यर्थः शारीरद्रव्यत्यागेपिमनश्चांचल्यात्तु
नरूपादेनसिद्धिर्नभवतीतिनवेत्यनेनउक्तंतेनहठत्यागस्यवसिद्धिकृदित्युक्तं अक्षरयोजनास्पष्टा ३ ममेतिस्वीकारः नममेतिपरित्यागःयस्यैतौमृत्यु
शाश्वतौ संसारमोक्षयोःमूलेइत्यर्थः ४ आत्मनिवुद्धौ भूतानिशास्त्रकर्तृत्वेन तथाकेचित्कर्तात्मानित्यइतिकेचिदनित्यइति ५ तत्राद्यदोषाभाव
माह अविनाशइति ६

रा० सत्वस्य कर्तृत्वधर्मवत्त्वात् बुद्धेः ७ द्वितीये कृतहानादिदोष इत्याह तस्मादिति यस्मात्कर्त्तुरनाशे मोक्षाभावः नाशे देहात्मवादप्रसंगस्तस्मा
२४ तत्कोत्तं अन्यतरनिश्चये तत्कामा चा पंथास्तन्मिथ्यात्वपक्षएवादर्त्तव्यः तेन कल्पितस्य शरीरद्वयस्यात्मन्येव त्यागो युक्त इत्याशयवाना
ह तस्मादिति निष्कलंकं वा सद्व्यस्यागं कृत्वांतरद्वयत्यागमकुर्वन्मूढ एवेत्याह द्वाभ्यां लब्ध्वापीति १० तर्हि भयद्वयत्यागः श्रेयानित्याशंक्याह वा

अथापि च महोत्पत्तिः सत्वस्य प्रलयस्तथा नश्वेशरीरे नष्टं स्याद्वृथा च स्यात्क्रियापथः ७ तस्मादेकांतमु
त्सृज्य पूर्वैः पूर्वतरैश्च यः पंथा निषेवितः सद्भिः स निषेव्यो विजानता ८ लब्ध्वापि दृष्टिपीठं कृत्वा सहस्त्या
वरं गेहमं न भुंक्ते यो नृपः स मूढ निष्फलं तस्य जीवितं ९ अथवा वसतो राजन्वने वन्येन जीवतः द्वंद्वेषु यस्य
समता मन्योरायोः स वर्त्तते १० वाह्यांतरं च भूतानां स्वभावं पश्य भारत येन पश्यति तत्तत्त्वं मुच्यते महाभया
त् ११ भवान्पिता भवान्माता भवान्भ्राता भवान्गुरुः दुःखप्रलापानार्त्तस्य तन्मे त्वं क्षंतुमर्हसि १२ ॥ ॥

ह्येति भूतानां वाह्यमाभ्यंतरं च यत्तद्द्वयं तत्सर्वं स्वभावं स्वस्य प्रत्यगात्मनः भावं सत्तां पश्य जानीहि तदात्मव्यतिरिक्तं नास्तीत्यर्थः तथा च
श्रुतिरात्मैवेदं सर्वमिति येन तु पुमान्सम्यक्तदात्मरूपं भूतं नित्यसिद्धं पश्यति तत्त्वमिति पाठेपि स एवार्थः तेन महतो भयात् उभयद्वयसंगजात्संसा राम०
रान्मुच्यते कल्पितस्य मरीचिकोदकस्येव मनसैव त्यागः कर्त्तव्यो न स्वरूपतः तस्यानिरूपणीयत्वादिति भावः १२ ॥ ॥ २४

भर्त्तैवभाषितंनतुज्ञानगर्वेण १२ त्रयोदशः अव्याहरतिवक्तव्यामावात्नतुक्रोधान्मौरव्याद्वा ४ साम्नासांत्ववादेन वल्गुनारमणीयेन ५

तथ्यंवापरिवातथ्यंयन्मयैतत्प्रभाषितं तद्विद्धिपृथिवीपालभक्त्याभरतसत्तम १३ इतिश्रीमहाभारतेशांतौरा
जधर्म्मेसहदेववाक्यं वैशंपायनउवाच अव्याहरतिकौंतेयधर्म्मराजेयुधिष्ठिरे भ्रातॄणांब्रुवतांतांस्तान्विवि
धान्वेदनिश्चयान् १ महाभिजनसंपन्नाश्रीमत्यायतलोचना अभ्यभाषतराजेंद्रद्रौपदीयोषितांवरा २
आसीनमृषभंराज्ञांभ्रातृभिःपरिवारितं सिंहशार्दूलसदृशैर्वारणैरिवयूथपं ३ अभिमानवतीनित्यं
विशेषेणयुधिष्ठिरे लालितासततंराज्ञाधर्म्मज्ञाधर्म्मदर्शिनी ४ आमंत्र्यविपुलश्रोणीसाम्नापरमव
ल्गुना भर्त्तारमभिसंप्रेक्ष्यततोवचनमब्रवीत् ५ द्रौपद्युवाच इमेतेभ्रातरःपार्थशुष्यंतेस्तोककाइव
वावाश्यमानास्तिष्ठंतिनचैनानभिनंदसे ६ नंदयैतान्महाराजमत्तानिवमहाद्विपान् उपपन्नेनवाक्ये
नसततंदुःखभागिनः ७ कथंद्वैतवनेराजन्पूर्वमुक्त्वातथावचः भ्रातॄनेतान्स्मसहितान्शीतवातातपा
र्दितान् ८ वयंदुर्योधनंहत्वामृधेभोक्ष्याममेदिनीं संपूर्णांसर्वकामानामाहवेविजयैषिणः ९ विरथां
श्चरथान्कृत्वानिहत्यचमहागजान् संस्तीर्यचरथैर्भूमिंससादिभिररिंदमाः १० ॥

स्तोककाःचातकाःवावाश्यमानाःपुनःपुनःक्रंदंतः ६उपपन्नेनयुक्तियुक्तेन ९ सर्वकामानांसमृद्धैः १० ॥ ॥ ॥

१२ क्लीवः अधीरः १५ प्रतिषेधोदंडः सत्यान्निर्वासनंवा १६ दानंआदानंचते १७ संकोचेनपांचया १८ त्रिभिर्गैः तिसृभिः शक्तिभिः

यजतांविविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः वनवासकृतंदुःखंभविष्यतिसुखायवः ११ इत्येतानेवमुक्त्वात्वंसु
यंधर्म्मसुतांवर कथमद्यपुनर्वीरविनिहंसिमतोमितः १२ नक्लीवोवसुधांभुंक्तेनक्लीवोधनमश्नुते नक्ली
वस्यगृहेपुत्रामत्स्याः पंकइवासते १३ नादंडःक्षत्रियोभातिनादंडोभूमिमश्नुते नादंडस्यप्रजाराजन्‌ःसुखं
विंदंतिभारत १४ मित्रतासर्वभूतेषुदानमध्ययनंतपः ब्राह्मणस्यैवधर्म्मःस्यान्नराज्ञोराजसत्तम १५ असत
तांप्रतिषेधश्चसतांचपरिपालनं एषराज्ञांपरोधर्म्मःसमरेचापलायनं १६ यस्मिन्क्षमाचक्रोधश्चदानादाने
भयाभये निग्रहानुग्रहौचोभौसवैधर्म्मविदुच्यते १७ नश्रुतेननदानेनसांत्वेननचेज्यया त्वयेयंपृथिवील
ब्धानसंकोचेनचाप्युत १८ यत्तद्बलममित्राणांतथावीरसमुद्यतं हस्त्यश्वरथसंपन्नंत्रिभिरंगैरनुत्तमं १९ रक्षि
तंद्रोणकर्णाभ्यामश्वत्थाम्नाकृपेणच तत्त्वयानिहतंवीरतस्माद्भुंक्ष्ववसुंधरां २० जंबूद्वीपोमहाराजनाना
जनपदायुतः त्वयापुरुषशार्दूलदंडेनमृदितःप्रभो २१ जंबूद्वीपेनसदृशःक्रौंचद्वीपोनराधिप अपरेणमम
हामेरोर्दंडेनमृदितस्त्वया २२

तोशव्रप्रभुशक्तिर्मंत्रशक्तिउत्साहशक्तिस्ताभिरनुत्तमंश्रेष्ठं १९ अपरेणापश्चिमतः २२ ॥२२॥ ॥

क्रौंचद्वीपादिवशीकरणांसिद्ध्वाराराजसूये २३ नस्यकर्मनासाहारामेषजग्रहणां नष्टेतिपाठेनष्टाःप्रेतास्तद्वाघानिरस्तैर्यैः रक्षावंधनादिकर्मभिः २४

क्रौंचद्वीपे नमहदशःशाकद्वीपोनराधिप पूर्वमार्गात्महामेरोर्दंडेनमर्दितस्त्वया २३ उत्तरेणामहामेरोःशाकद्वीपे
नमस्मितः भद्राश्वःपुरुषव्याघ्र दंडेनमर्दितस्त्वया २४ द्वीपाश्चसांतरद्वीपानानाजनपदाश्रयाः विगा
ह्यसागरंवीरदंडेनमर्दितास्त्वया २५ एतान्यप्रतिमेयानिकृत्वाकर्म्माणिभारत नप्रीयसेमहाराजपू
ज्यमानोद्विजातिभिः २६ सत्वंभ्रातृनिमान्दृष्ट्वाप्रतिनंदस्वभारत ऋषभानिवसंमत्तान्गजेंद्रान्जि
तानिव २७ अमरप्रतिमाःसर्वेशत्रुसाहाःपरंतपाः एकोपिहिसुखायैषांममस्यादितिमेमतिः २८
किंपुनःपुरुषव्याघ्रपतयोमेनरर्षभाः समस्तानींद्रियाणीवशरीरस्यविचेष्टने २९ अनृतंनाब्रवीच्छ्व
श्रूःसर्वज्ञासर्वदर्शिनी युधिष्ठिरस्त्वांपांचालिसुखेधास्यत्यनुत्तमे ३० हत्वाराजसहस्राणिबहून्याशु
पराक्रमः तद्व्यर्थंसंप्रपश्यामिमोहात्तवजनाधिप ३१ येषामुन्मत्तकोज्येष्ठःसर्वेतेप्यनुसारिणः तवोन्मा
दान्महाराजसोन्मादाःसर्वपांडवाः यदिहिस्युरनुन्मत्ताभ्रातरस्तेनराधिप वध्वात्वांनास्तिकैःसार्द्धंप्रशासे
युर्वसुंधरां कुरुतेमूढएवंहियःश्रेयोनाधिगच्छति ३३ धूपैरंजनयोगैश्चनस्यकर्म्मभिरेवच भेषजैःसचिकि

शा० ३५ एतेषांसमानमनाहृत्य ३९ चतुर्दशः याज्ञसेन्यावचः १ नादंडः क्षत्रियोभातीतिदंडोपयुक्तिमुपबृंहयतिदंडइति ३ उपादत्स्वदंडमितिशेषः
२६ साहंसर्वाधमालोकेस्त्रीणांभरतसत्तम तथाविनाकृतापुत्रैर्याहमिच्छामिजीवितुं ३५ एतेषांयतमानानांनेम
घवचनमद्यवै त्वंतुसर्वांमहींत्यक्त्वाकुरुषेस्वयमापदं ३६ यथास्तांसंमतौराज्ञांपृथिव्यांराजसत्तमौ मांधाताचां
वरीषश्चतथाराजन्विराजसे ३७ प्रशाधिपृथिवींदेवींप्रजाधर्मेणपालयन् सपर्वतवनद्वीपांमाराजन्विमना
भव ३८ यजस्वविविधैर्यज्ञैर्युध्यस्वारीन्प्रयच्छच धनानिभोगान्वासांसिद्विजातिभ्योनृपोत्तम ३९ इतिश्री
महाभारतेशांतिपर्वणिराजधर्मेद्रौपदीवाक्यंचतुर्दशोध्यायः वैशंपायनउवाच याज्ञसेन्यावचःश्रुत्वापुन
रेवार्जुनोब्रवीत अनुमान्यमहाबाहुंज्येष्ठंभ्रातरमच्युतं १ अर्जुनउवाचः दंडःशास्तिप्रजाःसर्वादंड
एवाभिरक्षति दंडःसुप्तेषुजागर्त्तिदंडंधर्मंविदुर्बुधाः २ धर्मंसंरक्षतेदंडस्तथैवार्थंजनाधिप कामंसंरक्ष
तेदंडस्त्रिवर्गोदंडउच्यते ३ दंडेनरक्ष्यतेधान्यंधनंदंडेनरक्ष्यते एवंविद्वन्नुपादत्स्वभावंपश्यस्वलौकिकं ४

लौकिकंभावंलोकव्यवहारंपश्यपश्यपश्यायद्याशोभनस्वभावो अलौकिकश्चतंभावंशास्त्रैकगम्यमात्मतत्त्वंतर्दृष्ट्यापश्यवहिश्चदंडमुपादत्स्व शा० 
तेनमहदेवोक्तःअर्थःप्रदर्शितोभवति ४ ॥ २६

५ सांसिद्धिके पशुवत्तदंडार्हस्वभावे ७ दंडशब्दार्थमाह यस्मादिति दमयति ताडनादिना दंडयति वित्तमपहरति ८ भुजा तत इति भुजे भक्ते तत्कात्यापि
तावेतनाप्रदानमित्यर्थः दानेराज्ञेद्रव्यार्पणं निर्दंडः दासमेव कारयेन्न त्वस्य दंडोऽस्ति शूद्रं तु कारयेद्दास्यमिति मनूक्तेः एतच्चाल्पापराधे ज्ञेयं १०

पा१

राजदंडभयादेके पापाः पापं न कुर्वते यमदंडभयादेके परलोकभयादपि ५ परस्परभयादेके पापाः पापं
न कुर्वते एवं सांसिद्धिके लोके सर्वं दंडे प्रतिष्ठितं ६ दंडस्यैव भयादेके न खादंति परस्परं अंधे तमसि मज्जेयु
र्यदि दंडो न पालयेत् ७ यस्माद्दान्तान्दमयत्यशिष्टान्दंडयत्यपि दमनाद्दंडनाच्चैव तस्माद्दंडं विदुर्बुधाः ८
वाचा दंडो ब्राह्मणानां क्षत्रियाणां भुजार्पणं दानदंडाः स्मृता वैश्या निर्दंडः शूद्र उच्यते ९ असंमोहा
६४ यमर्त्यानामर्थसंरक्षणाय च मर्यादास्थापिता लोके दंडसंज्ञा विशांपते १० यत्र श्यामो लोहिताक्षो दं
डश्चरति सूनृतः प्रजास्तत्र न मुह्यंते नेता चेत्साधु पश्यति ११ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षु
कः दंडस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः १२ नाभीतो यजते राजन्नाभीतो दातुमिच्छति नाभीतः पु
रुषः कश्चित्समये स्थातुमिच्छति १३ नाछित्वा परमर्माणि नाकृत्वा कर्म दुष्करं नाहत्वा मत्स्यघातीव प्रा
प्नोति महतीं श्रियं १४ नाघ्नतः कीर्तिरस्तीह न वित्तं न पुनः प्रजाः इंद्रो वृत्रवधेनैव महेंद्रः समपद्यत १५
श्यामः दृगभिघातेन दंडस्य साध्वसजनकत्वात् लोहिताक्षो दंडः पित्तः क्रोधातिशयात् सूघतः सततं उघतः साधुपश्यापराधं ११ महतो इंद्रलोकादिमतस्य

१९ घातीति स्वनपकारिणामपि वधः कार्य इत्यत्र दृष्टांतः १५

ग्रा० २७

श्वेष१
२० व्यालमृगा त्र्व्याघ्रः २१ यथा सृष्टः शौर्यंतेजो धृतिर्दाक्ष्यमित्याद्युक्तस्वभावः क्षत्रियः सृष्टोसि धात्रा २३ विनीतो अपनीतो क्रोध

यश्च देवा हंतारस्तांल्लोकोर्चयते भृशं हंता रुद्रस्तथा स्कंदः शक्रोग्निर्वरुणोपमः १६ हंता कालस्तथा
मृत्युर्वायुर्वैश्रवणो रविः वसवो मरुतः साध्या विश्वेदेवाश्च भारत १७ एतान्देवान्नमस्यंति प्रतापप्रणता
जनाः न ब्रह्माणं न धातारं न पूषाणं कथंचन १८ मध्यस्थान्सर्वभूतेषु दांतान्शमपरायणान् यजंते मा
नवाः केचित्प्रशांतान्सर्वकर्मसु १९ नहि पश्यामि जीवंतं लोके कंचिदहिंसया सत्वैः सत्वा हि जीवं
ति दुर्बलैर्बलवत्तराः २० नकुलो मूषिकानत्ति बिडालो नकुलं तथा बिडालमत्ति श्वा राजन् श्वानं व्याल
मृगास्तथा २१ तानत्ति पुरुषः सर्वान्पश्य कालो यथागतः प्राणस्यान्नमिदं सर्वं जंगमं स्थावरं च यत्
२२ विधानं दैवविहितं तत्र विद्वान्न मुह्यति यथा सृष्टोसि राजेंद्र तथा भवितुमर्हसि २३ विनीतक्रोध
हर्षा हि मंदा वनमुपाश्रिताः विना वधं न कुर्वंति तापसाः प्राणयापनं २४ उदके बहवः प्राणाः पृथिव्यां च
फलेषु च न च कश्चिन्न तान्हंति किमन्यत्प्राणयापनात् २५ सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित्
पक्ष्मणोपि निपातेन येषां स्यात्स्कंधपर्ययः २६ ग्रामान्निष्क्रम्य मुनयो विगतक्रोधमत्सराः वने कुटुंबधर्मा
हर्षा यैस्ते मंदाः क्षत्रियमाना २४ स्कंधपर्ययः देहस्य विपर्ययः २६ २७ ॥ ॥ णो दृश्यंते परिमोहिताः २७ ॥ ॥ ग्राम० ३७

